MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

An Examination of the Characteristics of Rasa in the Chandrālokaḥ and Alaṅkāraśekharaḥ

चन्द्रालोकालङ्कारशेखरशास्त्रे रसलक्षणविवेचनम्

Satyen Shit

Research Scholar, Dept. of Sanskrit
Vidyasagar University, Midnapore, West Bengal, India.
Email: satyenshit22@gmail.com
Page No: 100-111

Abstract: *Rasa theory is one of the most widely discussed and significant components of Sanskrit Alaṅkāraśāstra. All the rhetoricians have discussed the concept of rasa in their respective works. Among these rhetoricians, the present study focuses on two Alaṅkārikaḥ. There is a difference of opinion among the rhetoricians regarding the number of rasas. Some consider there to be eight rasas, some nine rasas, and others ten rasas. However, all the rhetoricians have discussed the characteristics and definition of rasa.*

One of them is the twelfth-century rhetorician Jayadevācārya, whose work on Alaṅkāraśāstra is the Chandrālokaḥ. The other is the sixteenth-century rhetorician Śrī Keśava Miśra, whose work on Alaṅkāraśāstra is the Alaṅkāraśekharaḥ. The principal subject of my research is to examine the discussions of the characteristics of rasa presented by these two rhetoricians and to determine which of the two treatments is more comprehensive and why.

Keywords: *Ālaṅkārikaḥ, Rasaḥ, Alaṅkāraśāstram, Rasalakṣaṇam, Sahṛdayaḥ, Chandrālokaḥ, Alaṅkāraśekharaḥ.*

प्रस्तावना

यः आस्वादितो भूत्वा सामाजिकगणानां चित्ते आनन्दस्य जनको भवति स हि रसः। अपि च तैत्तिरीयोपनिषदि त्रिकालदर्शिमुनिना उक्तः ब्रह्मस्वरूपमध्ये रसः निहितः। अतः तेन निगदितम् —

"रसो वै सः। रसं ह्येवयां लब्द्वाहऽनन्दी भवति। को ह्येवान्यात् कः प्राणाद् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।"[1]

अतः ब्रह्मानुभूतौ भक्तिसिञ्चितस्य आस्वाद्यमानविषयस्यापि रसत्वं संगच्छते। परन्तु ब्रह्मास्वादः रसास्वादश्च न अभिन्नं भवति। आचार्येण अभिगुप्तेन लोचनटीकायां स्वसंविदानन्दस्य आस्वादनमेव रसः इति उक्तः– "शब्दसमर्प्य-मानहृदयसंवादसुन्दरविभावानुभावसमुचितप्रग्विनिविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्दचर्वणव्यापाररसनीयरूपो रसः।"[2]

रससरस्वत्याः मन्दिरे स्वर्णप्रदीप-प्रज्वलनं करोति रसशास्त्रस्य प्रथमः प्रवक्ता हि भरतमुनिः। अपि च अनेन महर्षिणा भरतेन प्रणीतं नाट्यशास्त्रमेव प्रचलितालङ्कारग्रन्थसमूहानां मध्ये प्राचीनग्रन्थः। यदा प्रायः द्विसहस्त्रवर्षपूर्वं पृथिव्याः अधिकांशदेशाः अज्ञानान्धकारेण निमज्जिताः अभवन्, तदा सुदूरप्राच्ये कृष्टि-ऐतिह्ययोः प्रतिनिधिरूपेण भरतमुनिः सारस्वतसाधनायै आत्मनियोगं कृतवान्। तत्परं तेन सुवर्णवीणाध्वनेन सौन्दर्यश्रीः मुखरिता। भरतेन रचितं नाट्यशास्त्रमिति प्राचीन-रसतत्त्वविषयकम् पुस्तकम्।

किन्तु भरतस्य रचनायाः पूर्वमपि केचन प्राच्यालङ्कारिकाः सारस्वतसाधनायै आत्मनियोगं कुर्वन्ति। परन्तु तेषां साधनायाः फलात् वयं वञ्चिताः स्मः। कारणं वर्तमाने तेषां ग्रन्थाः नाममात्रेण सीमाबद्धाः। राजशेखरेण तस्य काव्यमीमांसाग्रन्थे उल्लिखितम् — भगवान् श्रीकण्ठः ब्रह्मा-विष्णुप्रभृतिभ्यः ६४ जनेभ्यः शिष्येभ्यः काव्यशास्त्रमुपदिशति। पुनः परमेष्टब्रह्मा तस्य अयोनिजपुत्रेभ्यः अर्थात् ऋषिभ्यः तां काव्यविद्यामुपदिशति। एतेषु सर्वश्रेष्ठः हि काव्यपुरुषः। एष काव्यपुरुषः १८

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

अधिकरणयुक्तकाव्यविद्यायाः विस्ताराय १८ जनेभ्यः शिष्येभ्य उपदिशति। ते शिष्याः प्रत्येकविषयस्योपरि पृथक् पृथक् ग्रन्थान् रचितवन्तः। यथा—

"तत्र कविरहस्यं सहस्राक्षःसन्नान्नासीत्, औक्तिकम् उक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्राचेता, यमकं यमः, चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुवेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचमारः इति।"[3]

कामसूत्रे उल्लिखितयोः सुवर्णनाभ-कुचमार-नामकयोः आद्याचार्ययोः नाम काव्यप्रकाशकारेण उद्धृतम्। नन्दिकेश्वरोऽपि रसशास्त्रस्य प्रवर्तकरूपेण प्रसिद्ध्यते। नन्दिकेश्वरेण रसशास्त्रस्योपरि यः ग्रन्थः रचितः स दुर्लभ आसीत् अभिनवगुप्तसमये। अतः अभिनवगुप्तेन नाट्यशास्त्रस्य अभिनवभारतीभाष्ये उक्तम्—

"यत् कीर्त्तिधरेण नन्दिकेश्वरमतमत्रागमित्वेन दर्शितं तदस्माभिः साक्षान्न दृष्टं तत् प्रत्ययात्तु लिख्यते संक्षेपतः। नन्दिकेश्वरमतानुसारेण अयं चित्रपुर्व्वरङ्गविधिः इति निबन्धः।।"[4]

शारदातनयेन तस्य भावप्रकाशग्रन्थे नन्दिकेश्वरस्य नाम उल्लेखितम्। तेन उक्तम्, भरतः नन्दिकेश्वरात् नाट्यतत्त्वस्योपदेशं लब्धवान्। तस्य आदेशेन अभिनेत्रे अभिनयविद्यायाः शिक्षां प्रदत्तवान्। परन्तु अध्यापकेन मनोमोहनघोषेण सम्पादिते नन्दिकेश्वरस्य 'अभिनय-दर्पणम्'— इति ग्रन्थे नाट्यवेदस्य कथा बहुवारमुल्लिखितास्ति। अतः अभिनयदर्पणं न नाट्यशास्त्रात् प्राचीनतमम्। अभिनवगुप्तेन भरतस्य पूर्ववर्ती नाट्यतत्त्वज्ञः काश्यपः इति अभिनवगुप्तेन वर्णितः। अपि च रागसम्बन्धेऽपि काश्यपमतं उद्धृतम्। काश्यपेन प्रणीताः केचन श्लोकाः अभिनवगुप्तेन तस्य अभिनवभारतीटीकायामुद्धृताः। श्लोकान् उक्त्वा अभिनवगुप्तेन निगदितम्—

"इत्येष काश्यपादुक्तो विनियोगः निरूपितः।"

आचार्येण दण्डिना प्रणीतस्य काव्यादर्शस्य हृदयाङ्गमटीकायामपि काश्यप-वररुच्योः नाम उल्लिखितम्। काव्यादर्शस्य प्रथमपरिच्छेदे एका कारिका विद्यते—

"पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्।।"5 का.द.१/२

अस्याः कारिकायाः व्याख्याप्रसङ्गे हृदयाङ्गमटीकायामस्ति—

"पूर्वेषां काश्यपवररुचिप्रभृतीनाम् आचार्याणां लक्षणशास्त्राणि संहृत्य पर्यालेच्य।" काव्यादर्शस्य श्रुतानुपालिनी-टीकायामपि काश्यप-नन्दिस्वामि-ब्रह्मदत्तानां नाम प्राप्यते। शारदातनयेन तस्य भावप्रकाशनग्रन्थे सदाशिव-गौरी-वासुकि-नारद-अगस्त-व्यास-अज्नेयप्रभृतानां नाट्यवेदस्य रचयितृणां नाम उल्लिखितम्। अतः तेन उक्तम्—

"तयैव नाट्यवेदस्य नियुक्तोऽध्यपाने तदा।।
.....नाट्यवेदमखिलं सम्यक्तमध्यापयत्।।"[6]

सङ्गीतरत्नाकरग्रन्थे बहुपुराणप्रसिद्धानां तथा साधारणालङ्कारग्रन्थकर्तृणां नाम उपलभ्यते। अस्मिन् प्रसङ्गे उक्तमस्ति—

"सदाशिवः शिवा ब्रह्मा भरतः कश्यपो मुनिः।
.....तेषां मतपयोनिधिम्।।"[7]

वस्तुतः एतेषां प्राचीनग्रन्थकर्तृणां रचना अधुना न लभते। अधुना प्रचलितालङ्कारग्रन्थेषु भरतप्रणीतं नाट्यशास्त्रम् रसतत्त्वालोचनात्मकः अतिप्राचीनग्रन्थः।

संस्कृतसाहित्ये विशिष्टानाम् पण्डितानां मध्येऽपि नाट्यशास्त्रस्य रचनाकालविषये मतभेदो दृश्यते। यथा- महामहोपाध्यायेन हरप्रसादशास्त्रिणः मते नाट्यशास्त्रं खिष्टीयद्वितीयशतके रचितम्। अस्मिन् ग्रन्थे स्वामि-सुगृहीतनाम-भद्र-प्रभृतीनां शब्दानामुल्लेखार्थं अध्यापकेन लेभिना मन्तव्यं कृतं क्षत्रपदस्य राजत्वकाले भरतः तस्य प्रसिद्धं नाट्यशास्त्रं रचितवान्।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

संस्कृतसाहित्ये ऐतिहासिकाध्यापककिथस्य मते खिष्टीयतृतीयशतकादनन्तरं भरतेन नाट्यशास्त्रं रचितम्। परन्तु छन्दःप्रयोगवैशिष्ट्यात्, भाषावैशिष्ट्यात्, अलङ्कारवैशिष्ट्यात् च मनोमोहनघोषेण उक्तं खीष्टीयप्रथम-द्वितीयशतकयोः नाट्यशास्त्रं रचितम्। अपि च उपलब्धेषु आलङ्कारग्रन्थेषु भरताचार्यस्य नाम उल्लिखितम्। अतः तस्य जनप्रीयतासीत्। एतेन बोध्यते यत, रसशास्त्रस्य आदिप्रवक्ता हि भरतमुनिः। अधुना सर्वैः उपलभ्यन्ते। अपि च अन्यान्याङ्कारिकैः रसस्य आदिप्रवर्तकरूपेण भरतः स्वीकृतः।

रसलक्षणविषये चन्द्रालोकालङ्कारशेखरयोः मतम्—

भामहादयः सर्वे आलङ्कारिकाः रसलक्षणप्रसङ्गे आलोचितवन्तः। तेषु अप्रसिद्धालङ्कारिकौ हि जयदेव-श्रीकेशवमिश्रौ। ताभ्यां स्व-स्व-ग्रन्थे रसलक्षणविषये उक्तम्—

चन्द्रालोककारस्य मतम्—

द्वादशशतकस्य विशिष्टालङ्कारिकेण जयदेवाचार्येण चन्द्रालोकग्रन्थस्य प्रथममयूखे काव्यस्य स्वरूपप्रसङ्गे 'रसः' इति पदं व्यवहृतम्—

"सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्।"[8]

तेन रसविषयेऽपि विस्तृता व्याख्या कृता 'रसादिनिरूपण-नामके षष्ठमयूखे। जयदेवाचार्येण मूलतः चन्द्रालोकग्रन्थस्य प्रथममयूखे काव्यलक्षणे— "निर्दोषा लक्षणवती सरीतिर्गुणभूषणा"[9] अत्र सरीतिशब्दः व्यवहृतः— इत्यनुसारेण लक्षणनिरूपणस्य अनन्तरं रीतिनिरूपणम् आवश्यकम्। परन्तु रीतिनिरूपणं विना रसनिरूपणम् असम्भवम्। कारणं रसं विहाय रीतिनिर्णयः कष्टसाध्यः। अनेन कारणेन ग्रन्थकारेण ग्रन्थस्यादौ रसनिरूपणं कृतम्। अतः जयदेवाचार्येण रसादिकारणरूपेण स्थितस्य विभावादेः लक्षणप्रसङ्गे निगदितम्—

"आलम्बनोद्दीपनात्मा विभावः कारणं द्विधा।
कार्यानुभावो भावाश्च सहायो व्यभिचार्यपि।।"[10]

अर्थात, रसस्य कारणं हि विभावः। अयं विभावः द्विधा विभक्तः। यथा— (१) आलम्बनविभावः (२) उद्दीपनविभावश्च। अनुभावो हि अस्य कारणस्य कार्यम्। व्यभिचारिभावो हि अस्य अनुभावस्य सहायकारणम्।

नाट्यशास्त्रकारेण भरतमुनिना उक्तं विभावानुभाव-व्यभिचारिसंयोगैः रसः सिध्यते। एते त्रयः विभावादयः रसस्य अङ्गानि भवन्ति। एतत्त्रयाणां मिश्रणेन सहृदयस्य हृदये आविर्भूतो यः पदार्थो स हि रसः। एवंरूपेण विभावदिना परिपुष्टः स्थायिभाव एव रसो भवति। अतः ग्रन्थकारजयदेवेन प्रथमश्लोके विभावादिनिरूपणं कृतम्। लौकिके रत्यादिप्रणयस्य यत् कारणं भवति, स काव्ये नाटके वा विभावो भवति। रत्यादीनामास्वाद्ययोग्यं हि विभावपदस्य यौगिकार्थः। अयं विभावः आलम्बनोद्दीपणभेदेन च द्विधा। रत्युत्पन्नं करोति यत् कारणं स हि विभावः। यथा— नायकादिः। अपि च उत्तेजितं करोति यत् कारणं स हि उद्दीपनविभावः। यथा— चन्द्रमा-सूर्यादयः। एवंरूपेण विभावस्य अनन्तरं उत्पन्नः अवस्थाविशेषः हि अनुभावः। यः विभावस्य कार्यं भवति। यथा— हास्य-कटाक्ष-भ्रुक्षेप-भुजचालन-जृम्भादयः। रत्यादेः सहकारिकारणं काव्ये तथा नाटके व्यभिचारिभावः सञ्चारिभावः वेति नाम्ना परिचितः। यथा— चिन्तादिः।

उदाहरणेन अवगम्यते यत्— कांचन नायिकां दृष्ट्वा कस्यचन नायकस्य चित्ते प्रणयो जायते। अस्याम् अवस्थायाम् इयं नायिका हि आलम्बनविभावः। कारणं नायिका हि केवलं प्रणयस्य मुख्यकारणम्। यदि नायिका न स्यात् तर्हि नायकहृदये प्रणयोऽपि न जायते। अस्याम् अवस्थायां कोयेलस्य कुहुतानेन, चन्द्रमायाः निर्मलालोकेन, वनलतायाः कुसुमितेन, भ्रमरस्य गुञ्जनेन, वायोः मनोरमपर्यावरणेन च नायकस्य हृदये प्रणयः उद्दीप्तो भवति। अनेनात्र कोयेलेन कुहुतानमादि उद्दीपनविभावो भवति। कारणं नायकस्य हृदये नायिकाविषयकप्रणयः अनेन भावेन जागरितो भवति। अपि च नायिकायाः विरहेण क्रन्दनं, हर्षादिभावो हि अनुभावः उच्यते। कारणं अयं भावः विभावात् अनन्तरं उत्पद्यते। तेन सह चिन्तादिसहकारिभावोऽपि उत्पद्यते। अस्मिन् समये नायकः चिन्तयति यत्, नायिकालाभो भविष्यति केन प्रकारेण मत्सदृशं व्याकुलत्वं तस्याः अस्ति न वा? एतादृशो

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

भावो हि व्यभिचारिभावः। एते विभाव-अनुभाव-व्यभिचारिभावाः प्रत्येकं रसं प्रति भिन्नाः भवन्ति। एतेन परिपुष्टः स्थायिभावः रसे परिणतो भवति। जयदेवाचार्येणापि त्रयस्त्रिंशद्व्यभिचारिभावाः उक्ताः। यथा—

"निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।।
व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च।।
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।।
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिंशदिमे भावाः समाख्यातास्तु नामतः।।"[11]

अर्थात्, (१) निर्वेदः (२) ग्लानिः (३) शङ्का (४) असूया (५) मदः (६) श्रमः (७) आलस्यम् (८) दैन्यम् (९) चिन्ता (१०) मोहः (११) स्मृतिः (१२) धृतिः (१३) व्रीडा (१४) चपलता (१५) हर्षः (१६) आवेगः (१७) जडता (१८) गर्वः (१९) विषादम् (२०) औत्सुक्यम् (२१) निद्रा (२२) अपस्मारः (२३) सुप्तम् (२४) प्रबोधः (२५) अमर्षः (२६) अवहित्थम् (२७) उग्रता (२८) मतिः (२९) व्याधिः (३०) उन्मादः (३१) मरणम् (३२) त्रासः (३३) वितर्कः इमे त्रयस्त्रिंशद्व्यभिचारिभावाः।

अथ जयदेवाचार्येण रसस्वरूपप्रसङ्गे उक्तम्—

"गलद्वेद्यान्तराद् भेदं हृदयेष्वजडात्मनाम्।
मिलन्मलयजालेप इवाह्लादं विकासयन्।।
काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावितः।
आस्वाद्यमानैकतनुः स्थायिभावो रसः स्मृतः।।"[12]

अर्थात्, यत्समये रसप्रतीतिः भवति, तत्समये सहृदयस्य हृदये रसातिरिक्तं कस्यापि अपरज्ञेयपदार्थस्य आविर्भावो न भवति। यथा— मृगमदसंवलितचन्दनालेपः इव सम्मलितविभाव-अनुभाव-व्यभिचारिभावैः काव्ये, नाटके तथा चित्रादौ सहृदयस्य आस्वाद्यमानात् रत्यादिस्थायिभावात् रसः समुत्पद्यते। अस्य विषयस्य तात्पर्यं हि— रत्यादिवासनया सहृदयपुरुषस्य हृदये विभावादैः परिपुष्टः रत्यादिस्थायिभावः निरन्तरभावनानन्तरं रसमुत्पादयति। अर्थात्, भरतमुनेः मते विभाव-अनुभाव-व्यभिचारिसंयोगाद् रसनिष्पत्तिर्भवति। यथा– शर्करा-लवण-जम्बीरमिश्रितं पानीयं पिवन् व्यक्तिः पृथग्रूपेण स्वादं न अनुभवति, तथा समूहालम्बनात्मकरसाभिव्यक्तेरपि रसास्वादनकाले पृथक् पृथग्भावेन विभावादीनां न प्रतीतिर्भवति। परन्तु हृदये प्रवेशं कृत्वा सर्वाङ्गम् आलिङ्गयन्ति। ब्रह्मानन्दस्य आस्वादम् अनुभवन् यः लोकविलक्षणः चमत्कारि-समूहालम्बनात्मकः स हि भावः। तत्सममये वहिः कस्यापि पदार्थस्य ज्ञानं न भवति। अन्तरे, वहिः, यत्र दृष्टिर्गच्छति, तत्र केवलम् आनन्द एव आनन्दो दृश्यते। अपि च जयदेवाचार्येण नवरसानां कथा उक्ता। यथा— शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भूत-शान्ताश्च। एतेषां नवरसानामपि नवस्थायिभावाः विद्यन्ते। यथा— रति-हास-करुण-शोक-क्रोध-उत्साह-भय-जुगुप्सा-विस्मय-शान्ताः इति।

अलङ्कारशेखरकारस्य मतम्—

षोडशशतकस्य आलङ्कारिकेण श्रीकेशवमिश्रेण 'रस'-पदस्य प्रथमोपस्थापनं कृतं काव्यस्वरूपनिरूपणे। यथा— "काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्।"[13] परन्तु रसविषये विस्तृता आलोचना कृता तेन अलङ्कारशेखरग्रन्थस्य अष्टमरत्ने। तेन रसस्वरूपप्रसङ्गे द्वे कारिके उक्ते। प्रथमाकारिका तु—

"कारणेनाऽथ कार्येण सहकारिभिरेव च।
व्यक्तत्वं नीयमानस्तु स्थायी भावो रसः स्मृतः।।"[14]

अर्थात्, कारण-कार्य-सहकारिकारणैः तथा व्यभिचारिभावेन व्यक्तः स्थायिभाव एव रसरूपेण प्राप्यते।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

अपि च तेन विभादिप्रसङ्गे वृत्तौ उक्तम्—

"कारणमङ्गनानवयौवनादि। कार्याणि—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।

वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका मताः।।

सहकारिण उद्यानादयः। व्यभिचारिणो ग्लान्यादयः।"[15]

अर्थात्, नार्यः अङ्गना तथा तस्याः नवयौवनमादि हि आलम्बनकारणम् उद्दीपनकारणञ्च। अपि च कार्याणि वक्तुं तेन अष्टौ सात्त्विकभावाः उक्ताः। यथा— (१) स्तम्भः (२) स्वेदः (३) रोमाञ्चः (४) स्वरभङ्गः (५) वेपथुः (६) वैवर्ण्यम् (७) अश्रु (८) प्रलयः। केशवमिश्रेण उद्यानादिनां सहकारिकारणत्वं स्वीकृतम्। ग्लान्यादिनां व्यभिचारिकारणम् उक्तम्।

अपि च तेन दशरूपककारधनञ्जयवत् अपरैकस्य रसस्य लक्षणं दत्तम्। यथा—

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।

आरोप्यमाण उत्कर्षस्थायी भावो रसः स्मृतः।।"[16]

अर्थात्, विभाव-अनुभाव-सात्त्विकभाव-व्यभिचारिभावैः आरोपितः स्थायिभावः एव रसः उच्यते।

अथ तेन विभावादिनां भेदाः तथा तस्य उदाहरणस्य कथा उक्ताः। यथा—

"विभावो द्विविधः, उद्दीपन आलम्बनश्च। तत्र कोकिलवसन्तादिरुद्दीपनः, नायिकादिरालम्बनः, योगात्।"[17]

अनन्तरं तेन अनुभावस्य स्वरूपप्रसङ्गे निगदितम्—

"अनुभावो विकारस्तु भावसूंचनात्मकः।"[18]

अर्थात्, अन्तःस्थितभावं यः वहिर्प्रकाशयति स हि अनुभावः। अस्य अनुभावस्य भेदप्रसङ्गे तेन उक्तम्—

"हेलाविच्छित्तिबिब्बोक-किलकिञ्चित-विभ्रमाः।

लीला विलासो हावश्च विक्षेपो विकृतं मदः।।

मोट्टायितं कुट्टमितं मौग्धं च तपनं तथा।

ललितं चेत्यमी हावाश्चेष्टाः शृङ्गारभावजाः।।

एताश्चस्माभिरेव प्रपञ्चितमन्यत्र।"[19]

अर्थात्, अनुभावः बहुविधः। यथा— सर्वविधहेलायुक्तः अङ्गविकारः, विच्छित्तियुक्ता वेषभूषा, गर्वेण प्रियवस्तुनः अनादरः, किलकिञ्चित हि प्रियागमनेन हास्यम्, क्रन्दनम् इत्यादयः। विभ्रमः अर्थात् अलङ्काराणाम् उपांशु ग्रहणम्, लीला अर्थात् प्रियतमस्य अनुकरणम्, विलासः अर्थात् प्रियागमने उपवसनम्, हावो भवति आकारेङ्गितेन सम्भोगेच्छाप्रकटनम्, विशेषः अर्थात् अप्राप्तशृङ्गारादि, विकृतम् अर्थात् किमपि उक्त्वा निरवः तिष्ठति, मदो भवति सौभाग्यम्, मोट्टायितं हि प्रियतमस्य चर्चायां कर्णादिघर्षणम्, मौग्ध्यं भवति ज्ञातविषयम् अज्ञात्वा कथनम्, तपनम् अर्थात् प्रियावियोगेन कामजप्रकटनम्, अपि च ललितं हि अङ्गस्य सुकुमारविन्यास्यैः शृङ्गारदीनां प्रकटनम्। इत्यादीनां विस्तरेण विश्लेषणं श्रीकेशवमिश्रेण अपरे पुस्तके कृतम्।

अथ श्रीकेशवमिश्रेण सात्त्विकभावस्य लक्षणप्रसङ्गे व्यक्तम—

"रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते।

निर्वृत्तयेऽस्य तत्त्यागात् प्रभवन्तीति सात्त्विकाः।।"[20]

अर्थात्, त्रिगुणात्मकानाम् अर्थात् सत्त्व-रज-तमासां सृष्टौ यस्य मनसि रज-तमयोः स्पर्शः नास्ति, केवलं विशुद्धसत्यमस्ति, तस्य शान्तिनिमित्तं रज-तमयोः त्यागपूर्णं यः विकारो भवति स तु सात्त्विकभावः।

इतःपरं व्यभिचारिभावस्य लक्षणप्रसङ्गे उक्तम्—

"विशेषेणाऽभितः काये स्थायिनं भावयन्ति ये।

अनुभावादिहेतुंस्तान् वदन्ति व्यभिचारिणः।।"[21]

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

अर्थात, यः विशेषणस्य अग्रे तिष्ठति, स्थायिभावं भावयति, अपि च अनुभावादीनां हेतुः भवति, स हि व्यभिचारिभावः।

तेन ३३ प्रकाराः व्यभिचारिभावाः उक्ताः। यथा—

"निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।
व्रीडा चपलता हर्षश्चावेगो जडता तथा।।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च।
सुप्तं विरोधोऽमर्षश्चाप्यवहित्थमथोग्रता।।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।।"[22]

अर्थात, निर्वेदः, ग्लानिः, दैन्यम, शङ्का, असूया, मदः, श्रमः, आलस्यम , मोहः, स्मृतिः, धृतिः, व्रीडा, चपलता, हर्षः, आवेगः, जडता, गर्वः, विषादः, औत्सुक्यता, निद्रा, अपस्मारः, सुप्तम, विरोधः, अमर्षः, अवहित्था, उग्रता, मतिः, व्याधिः, उन्मादः, मरणम, त्रासः, विज्ञेया, वितर्कश्च एते ३३ प्रकाराः व्यभिचारिभावाः।

अथ तेन नव रसाः व्यक्ताः। यथा—

"शृङ्गारहास्यकरुण-रौद्रवीरभयानकाः।
बीभत्साऽद्भूतशान्ताश्च काव्ये नव रसाः स्मृता।।"[23]

अर्थात, शृङ्गारः, हास्यम, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भूतः, शान्तश्च एते नव रसाः।

नवरसमुक्त्वा तेन नवानां स्थायिभावानां कथा व्यक्ता। यथा—

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयो भावाः निर्वेदः स्थायिनो नव।।"[24]

अनन्तरं तेन व्यभिचारिभावस्य लक्षणप्रसङ्गे भणितं यथा-

"विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
स्वात्मभावं नयत्यन्यान् स्थायी भावः स उच्यते।।"[25]

अर्थात, यः विरुद्धभावैः गुप्तः तिष्ठति, अपि च अविरुद्धभावैः न अवरुद्धो भवति, यः अन्तिमपर्यन्तं एकरूपेण स्थीयते, अन्यभावं यः स्वेन सह सम्मलितं करोति, स तु स्थायिभावः।

यस्य उदाहरणप्रसङ्गे उक्तम्— "लवणाकारः"।[26] अर्थात, समुद्रः। तत्समीपं यत् किमपि विरोधि-अविरोधिवस्तु लुक्कायितस्तिष्ठति, न वर्धते वा, परन्तु स्वादुनद्याः जलं स्वस्य स्वादे मेलयति।

अथ सर्वेषां भावानां मध्ये मुख्यो हि स्थायिभावः। अस्मिन् प्रसङ्गे तेन निगदितम्—

"एते च सर्वभावेषु मुख्याः। यदाह—
यथा नराणां मध्ये नृपतिः शिष्याणां च यथा गुरुः।
तथा सर्वेषु भावेषु स्थायी भावः स्मृतो महान्।।"[27]

अर्थात, यथा— मनुष्याणां मध्ये राजा, अपि च शिष्याणां मध्ये गुरुः श्रेष्ठः। तद्रूपं हि सर्वेषु भावेषु स्थायिभावः महान् भवति।

अनन्तरं रतिप्रभृतीनां स्थायिभावानां पृथक् पृथक् लक्षणं कृतम्। यथा— रतेः लक्षणे व्यक्तम्—

"मनोऽनुकुलविषयसुखात्मकसंवेदनं रतिः।"[28]

अर्थात, मनोऽनुकुलविषयं प्रति सुखात्मकसंवेदनं हि रतिः।

हासस्य लक्षणे तेन निगदितम्—

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

"अङ्गक्रीडादिभिश्चेतोविकारो हासः।"[29]

अर्थात्, आङ्गिकचेष्टया चित्ते या विकृतिः उत्पद्यते, सा हि हासः।

शोकस्य लक्षणे उद्धृतम्—

"इष्टनाशादिजनितं चित्तवैक्लव्यं शोकः।"[30]

अर्थात्, इष्टनाशेन उत्पन्नमनसः वैक्लव्यं हि शोकः।

क्रोधस्य लक्षणप्रसङ्गे भणितम्—

"प्रतिकुलेषु तैक्ष्ण्यप्ररोहः क्रोधः।"[31]

अर्थात्, आत्मनः प्रतिकुलं प्रति तीक्ष्णता विस्तारो हि क्रोधः।

उत्साहस्य लक्षणप्रसङ्गे तस्य अभिमतम्—

"कार्यारम्भे स्थिरसंरम्भ उत्साहः।"[32]

अर्थात्, कार्यस्य आरम्भे हृदयस्य स्थैर्यं हि उत्साहः।

भयस्य स्वरूपप्रसङ्गे तेन उक्तम्—

"व्याघ्रादिदर्शनजनितं चित्तवैक्लव्यं भयम्।"[33]

अर्थात्, व्याघ्रादिदर्शने चित्ते या वैक्लता दृश्यते, तत् हि भयम्।

जुगुप्सालक्षणे तेन भणितम्—

"दोषदर्शनात्पदार्थे गर्हणं जुगुप्सा।"[34]

अर्थात्, विकृत-दोषयुक्तपदार्थस्य दर्शनेन उद्भूता मानसिकघृणा हि जुगुप्सा।

विस्मयस्य लक्षणे तेन निगदितम्—

"लोकसीमाऽतिक्रान्तपदार्थविषयश्चित्तविकारो विस्मयः।"[35]

अर्थात्, लौकिकतायाः विरुद्धविषयकः आश्चर्यमयः चित्तविकारो हि विस्मयः।

निर्वेदस्वरूपप्रसङ्गे व्यक्तम्—

"तत्त्वज्ञानदीर्ष्यादिभिः स्वावमानं निर्वेदः।"[36]

अर्थात्, तत्त्वज्ञानेन ईर्ष्यायां समदर्शनं हि निर्वेदः।

अनन्तरं तेन रसं आत्मारूपेण स्वीकृत्वा तस्य प्रयोजनस्य कथा उक्ता—

"'रस आत्मे' त्युक्तम्। तत्र यथात्मानं विना शरीरप्रयोजनम्, तथा रसं विना काव्यम्। यथाह— साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा। तथैव नीरसं काव्यं न स्याद्रसिकतुष्टये।।"[37]

अर्थात्, आलङ्कारिकेण श्रीकेशवमिश्रेण तस्य ग्रन्थस्य रत्यादौ नामके द्वितीयमरीचौ काव्यस्यात्मरूपेण रसः उक्तः। अतः उद्धृतम्—

"अलङ्कारस्तु शोभायैः रस आत्मा परे मनः।"[38]

अपि च तेन अयं विषयः पुनः अष्टममरीचावपि व्यक्तः। अस्य रसस्य प्रयोजनप्रसङ्गे भणितम्— यथा आत्मानं विना शरीरं निष्प्रयोजनं भवति, तथा रसं विहाय काव्यं निरर्थकं भवति। सुस्वादुभोजनं यथा लवणविहीनं स्वादहीनं भवति, तथा नीरसकाव्यं रसिकान् निकषा सन्तोषजनकं न भवति।

अथ तस्य मते रसस्य परिभाषा का? अस्मिन् प्रसङ्गे तेन निगदितम्—

"तत्र रसत्वमङ्गाङ्गिभावापन्नसकलविभावादिसाक्षात्कारकत्वम्। विशेषणं समुहालम्बनवारणाय।"[39]

अर्थात्, अङ्गाङ्गिभावाप्राप्तविभावादीनां यत्र साक्षात्कारो भवति, तत्र रसः परिपुष्टो भवति। तथाहि "सकलविभावादिसाक्षात्कारकत्वं रसत्वम्"[40] इति। एवं स्वीकृते 'अङ्गाङ्गिभावापन्नम्' इति विशेषणस्य का आवश्यकता? अस्य

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

प्रश्नस्य समाधानेन उच्यते—

ज्ञायते यत्, यदि सकलविभावानुभाव-व्यभिचारिभावैः रसनिष्पत्तिः भवति, तर्हि 'व्यिदलिमलिनाम्बु'-इत्यादौ केवलं मेघाद्युपन्नो भवति, 'परिमृदितमृणाली' —इत्यादौ केवलं वितृष्णादिकार्यरूपं अनुभावो भवति, 'दुराकुत्सुकमागते'—इत्यादौ पद्ये औत्सुक्य-व्रीडा-हर्षादि-व्यभिचारिभावाः भवन्ति। अत्र क्रमशः त्रिषु पद्येषु अन्ययोः द्वयोः भावयोः न स्थितिर्परिलक्ष्यते। अतः वक्तुं शक्यते यत्, एतानि न सरसपद्यानि। कारणम् अत्र त्रयाणां भावानाम् अनुपस्थिता रसानुभूतिः न घटते। अतः श्रीकेशवमिश्रेण रसपरिभाषायां 'अङ्गाङ्गिभावापन्नम्' इति विशेषणं व्यक्तम्।

अस्य अभिप्रायो हि— विभावादिषु एतेषु त्रिषु एको मुख्यो अर्थात् अङ्गी भवति। अन्यौ द्वौ अङ्गिनः अङ्गं भवति। एतेन सिद्ध्यते यत्, एतानि त्रीणि कारणानि यदि तिष्ठेत् तर्हि सम्यक् भवन्ति, परन्तु यदि एकः प्रधानरूपेण वर्णितः, अन्यौ द्वौ गौणरूपेण तिष्ठतः, तर्हि रसानुभूतौ काऽपि बाधा न । अतः एतेषां त्रयाणां रसनिष्पत्तौ काव्यप्रकाशकारस्य मते 'तृणारणिमणि'— इति न्याये न तिष्ठति। परन्तु दण्डचक्रादिन्यायेन न सिद्ध्यते। अर्थात्, यथा तृण-अरणि-मणिषु अर्थात् एतेषु त्रिषु कश्चन एकस्य स्वल्पस्यापि अग्निः न उत्पद्यते। तथा एतैः त्रिभिः कारणैः रसनिष्पत्तौ न अनिवार्यः भूयते। कारणं दण्डचक्र्यादौ दण्डः यदि न तिष्ठेत् तर्हि कुम्भकारः हस्तादिना कार्यं करोति। एतेषां रसानुभुतौ द्विकारणस्य त्रिकारणस्य वा न अनिवार्यो भवति। कारणं रसनिष्पत्तिर्भवति 'द्रव्यादि' इति न्यायेन , 'दीपेन घटः' इति न्यायेन न। रसानुभूतेन दुग्धं दध्यां परिवर्तनं भवति। वस्तुतः अत्र द्वयोः एकत्वं दृश्यते। परन्तु रूपपरिवर्तने एकस्य तथा द्वयोः कारणस्यापि तिष्ठेत्। धर्मस्य साम्यता पूर्वसिद्धो न भवति। यथा– दीप-तैल-वार्त्तिकाः सद्भावस्य साधको भवन्ति। अतः तत् पूर्वजन्मार्जितं भवतु, इहजन्मार्जितं भवतु वा। अतः तेन 'अङ्गाङ्गिभावापन्नम्' इति विशेषणं सर्वथा उपयुक्तम्।

अनन्तरं श्रीकेशवमिश्रेण उक्तम्—

"रसत्वमपि जातिरिति वयम्।"[41]

अर्थात, श्रीकेशवमिश्रेण रसत्वमपि काचित् जातिः। कारणं जातेः लक्षणे नैयायिकैः उद्धृतम्—

"नित्यत्वे सति अनेकसमवेतत्वं जातित्वम्।"[42]

अर्थात्, नित्यतामवलम्ब्य अनेकेषु समवायसम्बन्धनेन परिव्याप्तो भवति रसः। आनन्दात्मकता हि नवरसस्य सत्ता, सप्रकाशकत्वम्, तन्मयतायाः परं वेद्यान्तरसम्पर्कस्य शून्यता, अपि च अनुभावमात्रेण अनुप्राणितत्त्वादि रसनित्यतायाः साधको भवति। यतः सकलसहृदयानां संवादभाग् भूत्वा अनेकेषु समवेतो भवति। अतः रसः जातिः इति। यदि केनापि नित्यतायां सुखाद्युपलब्धेः अभावः मन्यते तर्हि साहित्यदर्पणकारस्य मतं दर्शनीयम्—

"करुणादिरसे जायते यत् परं सुखम्।"[43]

अर्थात्, करुणादिरसेऽपि परमसुखं लभते। ईश्वरो हि दार्शनिकनित्यः। कैश्चन श्रोतृभिः रसः ईश्वररूपेण ख्यातः। यथा- "रसो वै सः"।[44] अनेन कारणेन काव्यकर्तारः रसं ब्रह्मास्वादसहोदररूपेण मन्यन्ते। अपि च काव्यशरीरे रसम् आत्मरूपेण स्वीकृतवन्तः। एवंरूपेण नित्यत्वे सति अनेकेषु समवेतत्वात् रसः जातिरूपेण आख्यायते।

समीक्षा

द्वयोः आलङ्कारिकयोः रसलक्षणविषये सादृश्यं तथा वैसादृश्यमुल्लिख्य वक्तुं शक्यते यत्, श्रीकेशवमिश्रस्य रसविषयका कारिका अधिका समादरणीया। कारणं श्रीकेशवमिश्रेण यद्यपि रसविषये आलोचना कृता परमतं गृहीत्वा। तथापि तेन रसस्य द्वे लक्षणे व्यक्ते। कारणं एकम् अपरं परिपुष्टं करोति। अपि च तेन केवलं विभावादिप्रसङ्गे नोक्तम्, तेषां लक्षणे तथा भेदविषयेऽपि उक्तम्। अपि च तेन रसतत्त्वस्य कारणरूपेण सात्त्विकभावस्य लक्षणं तथा भेदः उक्तः। यद्विषये जयदेवाचार्येण निरवः स्थितः। तेनापि रसः स्वीकृतः आत्मारूपेण। अस्मिन् प्रसङ्गे तेन उक्तं यथा आत्मा व्यतीतं शरीरं निष्प्रयोजनम्, तथा रसव्यतीतं काव्यं निरसो भवति। अपि च तेन रसस्य प्रयोजनीयताप्रसङ्गे निगदितम्—

"साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

तथैव नीरसं काव्यं न स्याद्रसिकतुष्टये।।"[45]

अर्थात्, यथा अतिसुन्दरं परिपाकभोजणं लवणं विहाय स्वादहीनं भवति, तथा नीरसकाव्यं रसिकजनान् न सन्तोषयति। एवंरूपेण तेन रसप्रयोजनस्य कथा उक्ता। अस्य रसस्य आस्वादग्रहणप्रसङ्गे नाट्यशास्त्रकारेणापि उक्तम्—

"कथम् आस्वाद्यते रसः? यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसान् आस्वादयन्ति सुमनसः पुरुषा हर्षादींश्चापि अधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्च अधिगच्छन्ति। तस्मान् नाट्यरसाः इति व्याख्याताः।"[46]

अर्थात्, केन प्रकारेण रसः आस्वाद्यते? अनेन उत्तरेण उक्तम्– यथा स्वच्छचित्तयुक्तः पुरुषः नानाव्यञ्जनेन संस्कतमन्नस्य गृहीत्वा आनन्दलाभं करोति, तथा सामाजिकगणाः आङ्गिक-वाचिक-सात्त्विकाभिनयैः अभिव्यक्तानां स्थायिभावानाम् आस्वादग्रहणं कृत्वा आनन्दलाभं कुर्वन्ति। एवंरूपेण तेन नाट्यरसः व्यक्तः।

मया दृश्यते यत् पूर्वाचार्यस्य भरतस्य सदृशं श्रीकेशवमिश्रेण रसस्य प्रयोजनस्य कथा उक्ता। अपि च तेन रसपरिभाषायाम् 'अङ्गाङ्गिभावापन्नम्'— इति पदस्य तात्पर्यविश्लेषणं कृतम्। मया दृश्यते कस्मिञ्चित् पद्ये केवलं एकं कारणं तिष्ठति, तर्हि एतानि काव्यानि भवितुमर्हति वा? अस्मिन् प्रसङ्गे तेन उक्तम्— त्रयाणामुपस्थितिं विहाय सरसकाव्यं न भवति। परन्तु यत्र एककारणं मुख्यं भवति, अपरे द्वे कारणे गौणे भवतः तत्र रसानुभूतौ न वाधा भवति। अतः अस्य अङ्गाङ्गिभावापन्नस्य प्रतिष्ठार्थं द्वौ न्यायौ स्वीकृतौ। एकं हि दण्डचक्रादिन्यायः, अपरो हि दध्यादिन्यायः। परन्तु जयदेवाचार्येण अस्मिन् विषये निरवः स्थितः।

अपि च तेन जातिरूपेण रस आख्यायते। कारणं नैयायिकानां मते जातेः लक्षणम्—

"नित्यत्वे सति अनेकसमवेतत्वं जातित्वम्।"[47]

अर्थात्, नित्यतामवलम्ब्य अनेकेषु समवायसम्बन्धनेन परिव्याप्तो भवति रसः। आनन्दात्मकता हि नवरसस्य सत्ता, सप्रकाशकत्वम्, तन्मयतायाः परं वेद्यान्तरसम्पर्कस्य शून्यता, अपि च अनुभावमात्रेण अनुप्राणितत्त्वादि रसनित्यतायाः साधको भवति। यतः सकलसहृदयानां संवादभाग् भूत्वा अनेकेषु समवेतो भवति। अतः रसः जातिः इति। रसस्य नित्ये तथा अनित्यप्रसङ्गे जगन्नाथाचार्येण रसगङ्गाधरग्रन्थे उक्तम्—

"सर्वथैव चास्य विशिष्टात्मनौ विशेषणं विशेष्यं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वं च सिद्धम्।"[48]

अर्थात्, समस्तप्रकारविशिष्टरसस्य विशेषणरूपेण विशेष्यरूपेण वा चिदंशं गृहीत्वा तस्य नित्यत्वं तथा स्वप्रकाशं सिध्यति। अपि च रसस्य रत्याद्यांशं गृहीत्वा तस्य अनित्यतां तथा परिभास्वतां सूचयति। परन्तु जयदेवाचार्येण रसः जातिः व्यक्तिः वा इति विषये निरवः स्थितः।

तेन स्थायिभावानां लक्षणमुक्त्वा सर्वेषां भावानां स्थायिभावो मुख्यः व्यक्तः। अस्मिन् प्रसङ्गे तेन एकं सुन्दरमुदाहरणमुद्धृतम्। यथा —

"यथा नराणां नृपतिः शिष्याणां च यथा गुरुः।
तथा सर्वेषु स्थायी भावः स्मृतो महान्।।"[49]

अर्थात्, यथा नरेषु राजा श्रेष्ठः, शिष्येषु गुरुः महान्, तथा सर्वेषु भावेषु स्थायिभावो महान्। श्रीकेशवमिश्रेण अयं श्लोकः भरताचार्यवत् उक्तः। भरताचार्येण उद्धृतः श्लोको यथा—

"यथा नराणां नृपतिः शिष्याणां च यथा गुरुः।
एवं हि सर्वभावानां भावः स्थायी महानिह।।"[50]

अर्थात्, मया दृश्यते यत्, श्रीकेशवमिश्रेण प्रायः भरताचार्यवत् समानाः विषयाः आलोचिताः। अतः तेन पूर्वाचार्यस्य मतमनुसृतम्। परन्तु जयदेवाचार्येण इत्यादिविषये निरवः स्थितः। परन्तु तेन रसविषये संक्षेपेण उक्तम्। एतत् मतं पाठकान् निकषा काठिन्यं बोध्यते। अतः मया मन्यते श्रीकेशवमिश्रस्य मतं पाठकान् निकषा अतीव ग्रहणयोग्यं भविष्यति, जयदेवाचार्यात्।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

पुनः अत्र अपरमपि वक्तुं शक्यते यत्, आलङ्कारिकश्रीकेशवमिश्रस्य पूर्वाचार्येण जयदेवाचार्येण अतीव सहजसरलभाषया रसस्य प्रयोजनस्य तथा स्वरूपस्य कथा व्यक्ता, श्रीकेशवमिश्रात्। अतः तस्य ग्रहणयोग्यतापि न अस्वीकरणीया। यद्यपि तस्य रसस्य लक्षणं संक्षिप्तं, पृथग्रूपेण विभावादिलक्षणं नोक्तम्। परन्तु तेन रचितः श्लोकः स्वकीयः। अतः मया वक्तुं शक्यते यत्, रसस्य लक्षणम् अधिकोत्कृष्टं श्रीकेशवमिश्रात्। अपि तेन रसस्य प्रयोजनीयता उक्ता। अतः यत्समये रसस्य प्रतीतिः भवति, तत्समये सहृदयस्य हृदये रसातिरिक्तम् अपरज्ञेयवस्तुनः आविर्भावो न भवति। यथा केसर-कस्तुर्यादिभिः सुगन्धिद्रव्यसम्मिलितचूर्णं आनन्दः उत्पद्यते तथा विभावानुभावव्यभिचारिभावैः सहृदयमनसि आनन्दो जायते। यम् अनुसृत्य परवर्त्यालङ्कारिकेण साहित्यदर्पणकारेण रसस्य प्रयोजनप्रसङ्गे उक्तम्—

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यानुरस्पर्शशुन्यो ब्रह्मस्वादसहोदरः।।"[51]

अर्थात्, सत्त्वगुणस्य उद्रेकहेतुना अयं रसः अखण्डः, स्वप्रकाशः, आनन्दचिन्मयः, अन्यज्ञेयविषयस्य स्पर्शशून्यः, ब्रह्मास्वादतुल्यः आनन्दमयः, अलौकिकः विस्मयरूपश्च भवन्ति। अतः सर्वैः रसविषये स्वरचिता तथा उत्कृष्टलक्षणयुक्ता आलोचना करणीया।

Endnotes

1. उपनिषद्, गीताप्रेस, पृ.३३९
2. काव्यप्रकाशः, सम्पा. सुनीलकुमार-जाना, पृ.१७९
3. काव्यमीमांसा, सम्पा. उदयचन्द्र-बन्द्योपाध्यायः, पृ.३
4. रससमीक्षा, सम्पा. रमारञ्जन-मुखोपाध्यायः, पृ.१४
5. काव्यादर्शः, सम्पा. ड. अनिलचन्द्र-वसुः, पृ.५१
6. भावप्रकाशनम्, सम्पा. यदुगिरि-यतिराजास्वामी, के.एस.रामास्वामी-शास्त्री च, पृ.२
7. संगीतरत्नाकरः, सम्पा. पण्डित-सुब्रह्मण्यशास्त्री, पृ.१२
8. चन्द्रालोकः, सम्पा. राजेन्द्र-उपाध्यायः, पृ.१०
9. चन्द्रालोकः, सम्पा. त्रिलोकीनाथ-द्विवेदी, पृ.११
10. चन्द्रालोकः, सम्पा. श्रीकृष्णमणित्रिपाठी, पृ.२००
11. चन्द्रालोकः, सम्पा. त्रिलोकीनाथ-द्विवेदी, पृ.२१९
12. चन्द्रालोकः, सम्पा. श्रीबटुकनाथ-शर्मः, पृ.११५
13. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.७
14. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२०
15. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२०
16. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२०-२२१
17. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४६
18. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४६
19. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४६
20. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४६
21. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४७
22. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४७
23. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२१
24. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
25. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
26. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

27. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
28. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
29. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
30. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
31. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
32. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
33. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
34. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
35. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
36. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
37. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
38. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
39. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
40. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
41. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
42. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२२
43. साहियदर्पणः, सम्पा. विमलाकान्त-मुख्योपाध्यायः, पृ.५८
44. उपनिषद्, सम्पा. हरिकृष्णदास-गोयेन्दका, पृ.३३९
45. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२१८
46. नाट्यशास्त्रम, सम्पा. अञ्जलिका-मुख्योपाध्यायः, पृ.१०१
47. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२२२
48. रसगङ्गाधरः, सम्पा. विद्युत्वरण-घोषः, पृ.१२१
49. अलङ्कारशेखरः, सम्पा. शशिनाथ-झा, पृ.२४४
50. नाट्यशास्त्रम, सम्पा. अञ्जलिका-मुख्योपाध्यायः, पृ.२०९
51. साहियदर्पणः, सम्पा. विमलाकान्त-मुख्योपाध्यायः, पृ.५४

Bibliography

- अग्रवालः, मदन-मोहनः। *रस-स्वरूप-निरूपणम्*। आगरा : भार्गव बुक हाउस, १९७६.
- अवधूतः, कालिकानन्दः। *उपनिषद् समग्र*। कलकाता : गिरिजा, २०१५(तृतीयसंस्करणम्)।
- उपाध्यायः, आचार्य-बलदेवः। *संस्कृत-वाङ्मय का बृहद् इतिहास(अष्चमखण्ड- काव्यशास्त्र)*। लखनऊ : उत्तर प्रदेश संस्कृत संस्थान, २००१(प्रथमसंस्करणम्)।
- काने, पि.भि। *संस्कृत काव्यशास्त्र का इतिहास*। दिल्ली : मोतिलाल बनारसीदास, १९६६(प्रथमसंस्करणम्)।
- केशवमिश्रः। *अलङ्कारशेखरः*। सम्पा. श्रीअनन्तरामशास्त्री। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९८४।
- गोयेन्दका, हरिकृष्णदासः। *उपनिषद्*। गोरक्षपुरम् : गीता प्रेस, २०१४(एकादशपुनर्मुद्रणम्)।
- चक्रवर्ती, ड. मनोजः। *संस्कृतकाव्यतत्त्वे रसवाद : उद्भव ओ क्रमविकाश*। कलकाता : संस्कृत पुस्तक भाण्डार, २००९(प्रथमप्रकाशः)।
- जगन्नाथः। *रसगङ्गाधरः*। सम्पा. विद्युत्-वरण-घोषः। कलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१७(प्रथमप्रकाशः)।
- जयदेवः। *चन्द्रालोकः*। सम्पा. ड. त्रीलोकीनाथद्विवेदी। दिल्ली : भारतीय विद्या प्रकाशनम्, २०१०(संस्करणम्)।
- जयदेवाचार्यः। *चन्द्रालोकः*। सम्पा. कथाभट्टः श्रीनन्दकिशोरशर्मा। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, २०२० (द्वादशसंस्करणम्)।
- जयदेवः। *चन्द्रालोकः*। सम्पा. गङ्गासागररायः। वाराणसी : चौखम्भा संस्कृत भवन, २०२०, (नवमसंस्करणम्) ।
- …..। ……। सम्पा. डा. भारतेन्दुद्विवेदी। वाराणसी : विश्वविद्यालय प्रकाशन, २००७ (द्वितीयसंस्करणम्)।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

- दण्डी। *काव्यादर्शः*। सम्पा. ड. अनिलचन्द्र-वसुः। कलकाता : संस्कृत वुक डिपो, २०१४(पुनर्मुद्रणम्)।
- द्विवेदी, ड. दशरथः। *अभिनव रस सिद्धान्त*। वाराणसी : विश्वविद्यालय प्रकाशन, २०२१(संस्करणम्)।
- दे, सुशीलकुमारः। *संस्कृत काव्यशास्त्र का इतिहास*। पटना : बिहार हिन्दी ग्रन्थ अकादमी, २०१९.
- भट्टाचार्य्यः, अमियकुमारः। *साहित्येर दोष, गुण ओ अलङ्कार प्रसङ्गे आचार्य मम्मट*। कलकाता : संस्कृत पुस्तक भाण्डार, २०१२ (प्रथमप्रकाशः)।
- भरतः। *नाट्यशास्त्रम्*। सम्पा. ड. अञ्जलिका-मुखोपाध्यायः। कलकाता : संस्कृत पुस्तक भाण्डार, २०१८(प्रथमप्रकाशः)।
- मम्मटः। *काव्यप्रकाशः*। सम्पा. ड. विपदभञ्जनपालः। कोलकाता : संस्कृत पुस्तक भाण्डार, १४२४(द्वितीयप्रकाशः)।
- मुख्योपाध्यायः, रमारञ्जनः। *रससमीक्षा*। कलकाता : संस्कृत पुस्तक भाण्डार, २०२१(पुनर्मुद्रणम्)।
- राजशेखरः। *काव्यमीमांसा*। सम्पा. ड. उदयचन्द्र-वन्द्योपाध्यायः। कलकाता : संस्कृत वुक डिपो, २०१०(प्रथमप्रकाशः)।
- विश्वनाथः। *साहित्यदर्पणः*। सम्पा. ड. सत्यरञ्जनवन्द्योपाध्यायः। कोलकाता : सदेश, २०१२(प्रथमसंस्करणम्)।